Created by Luke Gibson Upload Date: April 30, 2026

Reading Sanskrit

# *Subhāṣita* Collection

1. उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥

udyamena hi sidhyanti kāryāṇi na manorathaiḥ |
na hi suptasya siṃhasya praviśanti mukhe mṛgāḥ ||[1]

nārāyaṇasya *hitôpadeśe* 0.36 (śloka), p. 131

2. आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥

ācāryāt pādam ādatte pādaṃ śiṣyaḥ svamedhayā |
pādaṃ sabrahmacāribhyaḥ pādaṃ kālakrameṇa ca ||[2]

(śloka), p. 154

3. यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥

---

[1] South Asian *nīti* literature was transmitted into the Buddhist literary traditions of neighboring regions, including Tibet and Southeast Asia. Several Sanskrit *nīti* sayings found in this textbook also appear in the Pāli *Kavidappaṇanīti* ("*Nīti* of the Poet's Mirror") and other related texts from the Burmese extra-canonical tradition, where this well-known Sanskrit verse is found rendered in Pāli as *uyyāmena hi sijjhanti, kāriyāni na manorathaṃ, na hi suttassa sīhassa, pavisanti migā mukhe*.

[2] In the version found in Haradattamiśra's commentary on *sūtra* 1.2.7.29 of Āpastamba's *Dharmasūtra*, *pāda* D reads *pādaḥ kālena pacyate* "[and] a quarter matures with time." This reading is also found in a Chinese translation attributed to Kumārajīva, the *Chengshi Lun* (成實論; S. **Tattvasiddhi*): 一分從師受，一分因友得，一分自思惟，一分待時熟。"One part is received from the teacher, one part is gained through friends, one part comes from one's own reflection, and one part matures with time." One Pāli version of this saying, found in the commentary to the *Majjhima Nikāya* ("Collection of Middle-length Discourses"), similarly reads *pādo siddho ācariyā, pādo hissānubhāvato, taṃvijjāsevakā pādo, pādo kālena paccati* "One quarter is accomplished through the teacher, one quarter through one's own power, one quarter from those who dedicate themselves to the same knowledge, and one quarter matures with time."
The phrasing for *pāda* D given in our textbook, which appears to be unattested in the classical sources available to us, reflects the most widely circulated form of this saying in modern times. It is closely mirrored by the Pāli version found in the *Kavidappaṇanīti*: *ācariyā pādam ādatte, pādaṃ sisso sajānanā, pādaṃ sabrahmacārīhi, pādaṃ kālakkamena ca*.

yathā kāṣṭhaṃ ca kāṣṭhaṃ ca sameyātāṃ mahôdadhau |
sametya ca vyapeyātāṃ tadvad bhūtasamāgamaḥ ||

nārāyaṇasya *hitôpadeśe* 4.75 (śloka), p. 178

4. न हि वैरेण वैराणि शाम्यन्तीह कदाचन ।
क्षान्त्या वैराणि शाम्यन्ति एष धर्मः सनातनः ॥

na hi vaireṇa vairāṇi śāmyantîha kadācana |
kṣāntyā vairāṇi śāmyanti eṣa dharmaḥ sanātanaḥ ||

*udānavarge* 14.11 (śloka), p. 197

5. अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत् ।
जयेत् कदर्यं दानेन सत्येन त्वनृतं जयेत् ॥

akrodhena jayet krodham asādhuṃ sādhunā jayet |
jayet kadaryaṃ dānena satyena tv anṛtaṃ jayet ||

*udānavarge* 20.19 (śloka), p. 201

6. गीतैर्ह्रियन्ते हि मृगा वधाय
रूपार्थमग्नौ शलभाः पतन्ति ।
मत्स्यो गिरत्यायसमामिषार्थी
तस्मादनर्थं विषयाः फलन्ति ॥

gītair hriyante hi mṛgā vadhāya
rūpârtham agnau śalabhāḥ patanti |
matsyo giraty āyasam āmiṣârthī
tasmād anarthaṃ viṣayāḥ phalanti ||

aśvaghoṣasya *buddhacarite* 11.35 (indravajrā), p. 217

7. सर्वपापस्याकरणं कुशलस्योपसम्पदा ।
स्वचित्तपर्यवदनमेतद्बुद्धस्य शासनम् ॥

sarvapāpasyâkaraṇaṃ kuśalasyôpasampadā |
svacittaparyavadanam etad buddhasya śāsanam ||[3]

*udānavarge* 28.1 (śloka), p. 222

8. भवन्ति नम्रास्तरवः फलोद्गमैर्
नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥

bhavanti namrās taravaḥ phalôdgamair
navâmbubhir dūravilambino ghanāḥ |
anuddhatāḥ satpuruṣāḥ samṛddhibhiḥ
svabhāva evâiṣa parôpakāriṇām ||

kālidāsasy*âbhijñānaśākuntale* 5.12 (upendravajrā), p. 237

9. अप्रमादो ह्यमृतपदं प्रमादो मृत्युनः पदम् ।
अप्रमत्ता न म्रियन्ते ये प्रमत्ताः सदा मृताः ॥

apramādo hy amṛtapadaṃ pramādo mṛtyunaḥ padam |
apramattā na mriyante ye pramattāḥ sadā mṛtāḥ ||

*udānavarge* 4.1 (śloka), p. 241

10. जयो वैरं प्रसवति दुःखं शेते पराजितः ।
उपशान्तः सुखं शेते हित्वा जयपराजयौ ॥

jayo vairaṃ prasavati duḥkhaṃ śete parājitaḥ |
upaśāntaḥ sukhaṃ śete hitvā jayaparājayau ||

*avadānaśatake* 10.1 (śloka), p. 258

[3] This famous saying survives in a number of Sanskrit and Middle Indo-Aryan versions. In the *Udānavarga*, *pāda* B reads *kuśalasyôpasampadaḥ* (pl. nom. of *upasampad* f.). The reading given here is borrowed from the version found in the *Prātimokṣa Sūtra* of the Lokôttaravādimahāsāṃghika School.

11. इन्द्रियं विजितं येन तेनैव भुवनं जितम् ।
यश्चेन्द्रियैः पराभूतः स सर्वत्र पराजितः ॥

indriyaṃ vijitaṃ yena tenâiva bhuvanaṃ jitam |
yaś cêndriyaiḥ parābhūtaḥ sa sarvatra parājitaḥ ||

*bahudarśane* 31 (śloka), p. 262

12. क्लेशप्रहारान् संरक्षेत् क्लेशांश्च प्रहरेद्दृढम् ।
खड्गयुद्धमिवापन्नः शिक्षितेनारिणा सह ॥
तत्र खड्गं यथा भ्रष्टं गृह्णीयात् सभयस्त्वरम् ।
स्मृतिखड्गं तथा भ्रष्टं गृह्णीयान्नरकान् स्मरन् ॥

kleśaprahārān saṃrakṣet kleśāṃś ca prahared dṛḍham |
khaḍgayuddham ivâpannaḥ śikṣitenâriṇā saha ||
tatra khaḍgaṃ yathā bhraṣṭaṃ gṛhṇīyāt sabhayas tvaram |
smṛtikhaḍgaṃ tathā bhraṣṭaṃ gṛhṇīyān narakān smaran ||

śāntidevasya *bodhicaryâvatāre* 7.68-69 (śloka), p. 280

13. अर्था गृहे निवर्तन्ते श्मशाने मित्रबान्धवाः ।
सुकृतं दुष्कृतं चैव गच्छन्तमनुगच्छति ॥

arthā gṛhe nivartante śmaśāne mitrabāndhavāḥ |
sukṛtaṃ duṣkṛtaṃ câiva gacchantam anugacchati ||

kaliṅgarājasya *sûktiratnahāre* 34.2 (śloka), p. 284

14. पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते ।
तस्मात् पुरुषकारेण यत्नं कुर्यादतन्द्रितः ॥

pūrvajanmakṛtaṃ karma tad daivam iti kathyate |
tasmāt puruṣakāreṇa yatnaṃ kuryād atandritaḥ ||[4]

nārāyaṇasya *hitôpadeśe* 0.31 (śloka), p. 284

[4] *Kavidappaṇanīti* (Pāli): *pubbajātikataṃ kammaṃ, taṃ kammamīti kathyate, tasmā purisākārenaṃ, yataṃ kare atandito.*

15. धर्मं समासतो ऽहिंसां वर्णयन्ति तथागताः ।
शून्यतामेव निर्वाणं केवलं तदिहोभयम् ॥

dharmaṃ samāsato ’hiṃsāṃ varṇayanti tathâgatāḥ |
śūnyatām eva nirvāṇaṃ kevalaṃ tad ihôbhayam ||

āryadevasya *catuḥśatake* 12.23 (śloka), p. 285

16. यो जानीयादहं बाल इति बालः स पण्डितः ।
बालः पण्डितमानी तु बाल एव निरुच्यते ॥

yo jānīyād ahaṃ bāla iti bālaḥ sa paṇḍitaḥ |
bālaḥ paṇḍitamānī tu bāla eva nirucyate ||

*udānavarge* 25.22 (śloka), p. 285

17. मनःपूर्वङ्गमा धर्मा मनःश्रेष्ठा मनोजवाः ।
मनसा चेत् प्रदुष्टेन भाषते वा करोति वा ।
ततस्तं दुःखमन्वेति चक्रं वा वहतः पदम् ॥
मनःपूर्वङ्गमा धर्मा मनःश्रेष्ठा मनोजवाः ।
मनसा चेत् प्रसन्नेन भाषते वा करोति वा ।
ततस्तं सुखमन्वेति च्छाया वा ह्यनुगामिनी ॥

manaḥpūrvaṅgamā dharmā manaḥśreṣṭhā manojavāḥ |
manasā cet praduṣṭena bhāṣate vā karoti vā |
tatas taṃ duḥkham anveti cakraṃ vā vahataḥ padam ||
manaḥpūrvaṅgamā dharmā manaḥśreṣṭhā manojavāḥ |
manasā cet prasannena bhāṣate vā karoti vā |
tatas taṃ sukham anveti cchāyā vā hy anugāminī ||

*udānavarge* 31.23-24 (śloka), p. 304

18. विनाशयति दुर्दृष्टा शून्यता मन्दमेधसम् ।
सर्पो यथा दुर्गृहीतो विद्या वा दुष्प्रसाधिता ॥

vināśayati durdṛṣṭā śūnyatā mandamedhasam |
sarpo yathā durgṛhīto vidyā vā duṣprasādhitā ||

nāgârjunasya *madhyamake* 24.11 (śloka), p. 309

19. यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥

yathā dhenusahasreṣu vatso vindati mātaram |
tathā pūrvakṛtaṃ karma kartāram anugacchati ||

*mahābhārate* 12.174.16 (śloka), p. 310

20. सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ॥

sarve kṣayântā nicayāḥ patanântāḥ samucchrayāḥ |
saṃyogā viprayogântā maraṇântaṃ hi jīvitam ||

*avadānaśatake* 92.1 (śloka), p. 310

21. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥

yatra nāryas tu pūjyante ramante tatra devatāḥ |
yatrâitās tu na pūjyante sarvās tatrâphalāḥ kriyāḥ ||

*manusmṛtau* 3.56 (śloka), p. 311

22. देवेन प्रथमं जितो ऽसि शशभृल्लेखाभृतानन्तरं
बुद्धेनोद्धतबुद्धिना स्मर ततः कान्तेन पान्थेन मे ।
त्यक्त्वा तान् बत हंसि मामतिकृशां बालामनाथां स्त्रियं
धिक् त्वां धिक् तव पौरुषं धिगुदयं धिक् कार्मुकं धिक् शरान् ॥

devena prathamaṃ jito ’si śaśabhṛllekhābhṛtânantaraṃ
buddhenôddhatabuddhinā smara tataḥ kāntena pānthena me |
tyaktvā tān bata haṃsi mām atikṛśāṃ bālām anāthāṃ striyaṃ
dhik tvāṃ dhik tava pauruṣaṃ dhig udayaṃ dhik kārmukaṃ dhik śarān ||

śrīdharadāsasya *saduktikarnâmṛte* 987 (śārdūlavikrīḍita), p. 331

23. फेनपिण्डोपमं रूपं वेदना बुद्बुदोपमा ।
मरीचिसदृशी संज्ञा संस्काराः कदलीनिभाः ।
मायोपमं च विज्ञानमुक्तमादित्यबन्धुना ॥

phenapiṇḍôpamaṃ rūpaṃ vedanā budbudôpamā |
marīcisadṛśī saṃjñā saṃskārāḥ kadalīnibhāḥ |
māyôpamaṃ ca vijñānam uktam ādityabandhunā ||

candrakīrteḥ *prasannapadāyām* (śloka), p. 338

24. सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥

sarvâśucinidhānasya kṛtaghnasya vināśinaḥ |
śarīrakasyâpi kṛte mūḍhāḥ pāpāni kurvate ||

harṣasya *nāgânande* 4.7 (śloka), p. 339

25. क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनुर्
नरः संसाराङ्के विशति यमधानीजवनिकाम् ॥

kṣaṇaṃ bālo bhūtvā kṣaṇam api yuvā kāmarasikaḥ
kṣaṇaṃ vittair hīnaḥ kṣaṇam api ca saṃpūrṇavibhavaḥ |
jarājīrṇair aṅgair naṭa iva valīmaṇḍitatanur
naraḥ saṃsārâṅke viśati yamadhānījavanikām ||

bhartṛharer *vairāgyaśatake* 50 (śikhariṇī), p. 360

26. श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

śrūyatāṃ dharmasarvasvaṃ śrutvā câivâvadhāryatām |
ātmanaḥ pratikūlāni pareṣāṃ na samācaret ||

viṣṇuśarmanaḥ *pañcatantre* 3.104 (śloka), p. 363

27. गच्छन् पिपीलको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयो ऽपि पदमेकं न गच्छति ॥

gacchan pipīlako yāti yojanānāṃ śatāny api |
agacchan vainateyo ʼpi padam ekaṃ na gacchati ||[5]

vallabhadevasya *subhāṣitâvalyām* 2686 (śloka), p. 363

28. ते ऽप्यासन् दंशमशका मक्षिकाः कृमयस्तथा ।
यैरुत्साहवशात् प्राप्ता दुरापा बोधिरुत्तमा ॥

te ʼpy āsan daṃśamaśakā makṣikāḥ kṛmayas tathā |
yair utsāhavaśāt prāptā durāpā bodhir uttamā ||

śāntidevasya *bodhicaryâvatāre* 7.18 (śloka), p. 364

29. कामक्रोधौ द्वयमपि पदं प्रत्यनीकं वशित्वे
हत्वानङ्गं किमिव हि रुषा साधितं त्र्यम्बकेण ।
यस्तु क्षान्त्या शमयति शतं मन्मथाद्यानरातीन्
कल्याणं वो दिशतु स मुनिग्रामणीरर्कबन्धुः ॥

kāmakrodhau dvayam api padaṃ pratyanīkaṃ vaśitve
hatvânaṅgaṃ kim iva hi ruṣā sādhitaṃ tryambakeṇa |
yas tu kṣāntyā śamayati śataṃ manmathâdyān arātīn
kalyāṇaṃ vo diśatu sa munigrāmaṇīr arkabandhuḥ ||

vidyâkarasya *subhāṣitaratnakośe* 1.3 (mandâkrāntā), p. 384

[5] *Kavidappaṇanīti* (Pāli): *gaccham kipilliko yāti, yojanānaṃ satānipi, agacchaṃ venayyo api, padam ekaṃ na gacchati.*

30. चित्तं यस्य स्फटिकविमलं नैव गृह्णाति रागं
कारुण्यार्द्रे मनसि निखिलाः शोषिता येन दोषाः ।
अक्रोधेन स्वयमभिहतो येन संसारशत्रुः
सर्वज्ञो ऽसौ भवतु भवतां श्रेयसे निश्चलाय ॥

cittaṃ yasya sphaṭikavimalaṃ nâiva gṛhṇāti rāgaṃ
kāruṇyârdre manasi nikhilāḥ śoṣitā yena doṣāḥ |
akrodhena svayam abhihato yena saṃsāraśatruḥ
sarvajño 'sau bhavatu bhavatāṃ śreyase niścalāya ||

kṣemêndrasya *bodhisattvâvadānakalpalatāyām* 1.1 (mandâkrāntā), p. 389

31. सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥

sampatsu mahatāṃ cittaṃ bhavaty utpalakomalam |
āpatsu ca mahāśailaśilāsaṃghātakarkaśam ||[6]

bhartṛharer *nītiśatake* 66 (śloka), p. 390

32. श्वःकार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
न हि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतम् ॥

śvaḥkāryam adya kurvīta pūrvâhṇe câparâhṇikam |
na hi pratīkṣate mṛtyuḥ kṛtaṃ vâsya na vā kṛtam ||

*mahābhārate* 12.169.14 (śloka), p. 391

33. कृताकृतापरीक्षो ऽयं मृत्युर्विश्रम्भघातकः ।
स्वस्थास्वस्थैरविश्वास्य आकस्मिकमहाशनिः ॥

kṛtâkṛtâparīkṣo 'yaṃ mṛtyur viśrambhaghātakaḥ |
svasthâsvasthair aviśvāsya ākasmikamahāśaniḥ ||

---

[6] A Pāli version of this verse can be found in the *Nītimañjarī* ("Bouquet of [verses] on *Nīti*"), another text belonging to the Pāli *nīti* literature: *sampatyaṃ mahataṃ cittaṃ, bhave uppale komalaṃ, vipatyaṃ ca mahāselasilāsaṅghātakakkasaṃ.*

śāntidevasya *bodhicaryâvatāre* 2.34 (śloka), p. 391

34. निर्दुर्जनान्यनुपभुक्तसरित्तरूणि
 नानाविहंगविरुतानि मृगाकुलानि।
 वैडूर्यकुट्टिममनोहरशाद्वलानि
 क्रीडावनाधिकसुखानि तपोवनानि॥

nirdurjanāny anupabhuktasarittarūṇi
 nānāvihaṃgavirutāni mṛgâkulāni |
vaiḍūryakuṭṭimamanoharaśādvalāni
 krīḍāvanâdhikasukhāni tapovanāni ||

āryaśūrasya *jātakamālāyām* 9.33 (vasantatilakā), p. 410

35. निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
 लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
 अद्यैव वा मरणमस्तु युगान्तरे वा
 न्याय्यात् पथः प्रविचलन्ति पदं न धीराः॥

nindantu nītinipuṇā yadi vā stuvantu
 lakṣmīḥ samāviśatu gacchatu vā yathêṣṭam |
adyâiva vā maraṇam astu yugântare vā
 nyāyyāt pathaḥ pravicalanti padaṃ na dhīrāḥ ||

bhartṛharer *nītiśatake* 84 (vasantatilakā), p. 415

36. वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
 सम इह परितोषो निर्विशेषो विशेषः।
 स तु भवति दरिद्रो यस्य तृष्णा विशाला
 मनसि च परितुष्टे को ऽर्थवान् को दरिद्रः॥

vayam iha parituṣṭā valkalais tvaṃ dukūlaiḥ
sama iha paritoṣo nirviśeṣo viśeṣaḥ |
sa tu bhavati daridro yasya tṛṣṇā viśālā
manasi ca parituṣṭe ko ’rthavān ko daridraḥ ||

bhartṛharer *vairāgyaśatake* 53 (mālinī), p. 431

37. गते ऽपि वयसि ग्राह्या विद्या सर्वात्मना बुधैः ।
यद्यपि स्यान्न फलदा सुलभा सान्यजन्मनि ॥

gate ’pi vayasi grāhyā vidyā sarvâtmanā budhaiḥ |
yady api syān na phaladā sulabhā sânyajanmani ||

śārṅgadharapaddhatau 76.6 (śloka), p. 434

38. पुस्तकस्था च या विद्या परहस्ते च यद्धनम् ।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥

pustakasthā ca yā vidyā parahaste ca yad dhanam |
kāryakāle samutpanne na sā vidyā na tad dhanam ||[7]

*cāṇakyanītau* 678 (śloka), p. 435

39. वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥

vajrād api kaṭhorāṇi mṛdūni kusumād api |
lokôttarāṇāṃ cetāṃsi ko hi vijñātum arhati ||

bhavabhūter *uttararāmacarite* 2.7 (śloka), p. 436

[7] *Kavidappaṇanīti* (Pāli): *potthakesu ca yaṃ sippaṃ* (“art, craft”; S. *śilpa*), *parahatthesu yaṃ dhanaṃ*; *yathākicce samuppanne, na taṃ sippaṃ na taṃ dhanaṃ*.

40. अन्धीकरोमि भुवनं बधिरीकरोमि
धीरं सचेतनमचेतनतां नयामि ।
कृत्यं न पश्यति न येन हितं शृणोति
धीमानधीतमपि न प्रतिसंदधाति ॥

andhīkaromi bhuvanaṃ badhirīkaromi
dhīraṃ sacetanam acetanatāṃ nayāmi |
kṛtyaṃ na paśyati na yena hitaṃ śṛṇoti
dhīmān adhītam api na pratisaṃdadhāti ||

kṛṣṇamiśrasya *prabodhacandrôdaye* 2.29 (vasantatilakā), p. 450

41. आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ॥

ālasyaṃ hi manuṣyāṇāṃ śarīrastho mahān ripuḥ |
nâsty udyamasamo bandhuḥ kurvāṇo nâvasīdati ||

bhartṛharer *nītiśatake* 86 (śloka), p. 454

42. मातापितृसहस्राणि पुत्रदारशतानि च ।
युगे युगे व्यतीतानि कस्य ते कस्य वा वयम् ॥

mātāpitṛsahasrāṇi putradāraśatāni ca |
yuge yuge vyatītāni kasya te kasya vā vayam ||

vallabhadevasya *subhāṣitâvalyām* 3288 (śloka), p. 454

43. हीनः प्रार्थयते स्वसंततिगतं यैस्तैरुपायैः सुखं
मध्यो दुःखनिवृत्तिमेव न सुखं दुःखास्पदं तद्यतः ।
श्रेष्ठः प्रार्थयते स्वसंततिगतैर्दुःखैः परेषां सुखं
दुःखात्यन्तनिवृत्तिमेव च यतस्तद्दुःखदुःख्येव सः ॥

hīnaḥ prārthayate svasaṃtatigataṃ yais tair upāyaiḥ sukhaṃ
madhyo duḥkhanivṛttim eva na sukhaṃ duḥkhâspadaṃ tad yataḥ |
śreṣṭhaḥ prārthayate svasaṃtatigatair duḥkhaiḥ pareṣāṃ sukhaṃ
duḥkhâtyantanivṛttim eva ca yatas tadduḥkhaduḥkhy eva saḥ ||

vasubandhor *abhidharmakośabhāṣye* (śārdūlavikrīḍita), p. 473

44. ये केचिद्दुःखिता लोके सर्वे ते स्वसुखेच्छया ।
ये केचित् सुखिता लोके सर्वे ते ऽन्यसुखेच्छया ॥

ye kecid duḥkhitā loke sarve te svasukhêcchayā |
ye kecit sukhitā loke sarve te ’nyasukhêcchayā ||

śāntidevasya *bodhicaryâvatāre* 8.129 (śloka), p. 478

45. प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ॥

prārabhyate na khalu vighnabhayena nīcaiḥ
prārabhya vighnavihatā viramanti madhyāḥ |
vighnaiḥ punaḥ punar api pratihanyamānāḥ
prārabdham uttamajanā na parityajanti ||

bhartṛharer *nītiśatake* 27 (vasantatilakā), p. 478

46. वलीभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥

valībhir mukham ākrāntaṃ palitenâṅkitaṃ śiraḥ |
gātrāṇi śithilāyante tṛṣṇâikā taruṇāyate ||

bhartṛharer *vairāgyaśatake* 8 (śloka), p. 499

47. धन्यैः शशाङ्ककरचन्दनशीतलेषु
    रम्येषु हर्म्यविपुलेषु शिलातलेषु ।
निःशब्दसौम्यवनमारुतवीज्यमानैश्
    चंक्रम्यते परहिताय विचिन्त्यते च ॥

dhanyaiḥ śaśâṅkakaracandanaśītaleṣu
    ramyeṣu harmyavipuleṣu śilātaleṣu |
niḥśabdasaumyavanamārutavījyamānaiś
    caṃkramyate parahitāya vicintyate ca ||

śāntidevasya *bodhicaryâvatāre* 8.86 (vasantatilakā), p. 519

48. एतत् कवीन्द्रमुखचन्द्रमसः कदाचित्
    काव्याभिधानममृतं यदि नागलिष्यत् ।
संसारिणां विविधदुःखसहस्रभाजां
    चेतोविनोदसदनं किमिहाभविष्यत् ॥

etat kavîndramukhacandramasaḥ kadācit
    kāvyâbhidhānam amṛtaṃ yadi nâgaliṣyat |
saṃsāriṇāṃ vividhaduḥkhasahasrabhājāṃ
    cetovinodasadanaṃ kim ihâbhaviṣyat ||

śrīdharadāsasya *saduktikarṇâmṛte* 2158 (vasantatilakā), p. 544

49. इत्येषा व्युपशान्तये न रतये मोक्षार्थगर्भा कृतिः
    श्रोतॄणां ग्रहणार्थमन्यमनसां काव्योपचारात् कृता ।
यन्मोक्षात् कृतमन्यदत्र हि मया तत् काव्यधर्मात् कृतं
    पातुं तिक्तमिवौषधं मधुयुतं हृद्यं कथं स्यादिति ॥

ity eṣā vyupaśāntaye na rataye mokṣârthagarbhā kṛtiḥ
    śrotṝṇāṃ grahaṇârtham anyamanasāṃ kāvyôpacārāt kṛtā |
yan mokṣāt kṛtam anyad atra hi mayā tat kāvyadharmāt kṛtaṃ
    pātuṃ tiktam ivâuṣadhaṃ madhuyutaṃ hṛdyaṃ kathaṃ syād iti ||

aśvaghoṣasya *saundaranande* 18.63 (śārdūlavikrīḍita), p. 546

50. असौ रसौचित्यगुणोज्ज्वलो ऽपि
गुम्फो न काव्यव्यपदेशयोग्यः ।
धत्ते खलस्यापि न दुर्विषह्य-
द्वेषग्रहोत्सारणमन्त्रतां यः ॥

asau rasâucityaguṇôjjvalo 'pi
gumpho na kāvyavyapadeśayogyaḥ |
dhatte khalasyâpi na durviṣahya-
dveṣagrahôtsāraṇamantratāṃ yaḥ ||

bhagadattajalhaṇasya *sûktimuktâvalyām* 4.11 (upajāti), p. 547

51. चला विभूतिः क्षणभङ्गि यौवनं
कृतान्तदन्तान्तरवर्ति जीवितम् ।
तथाप्यवज्ञा परलोकसाधनेष्व्
अहो नृणां विस्मयकारि चेष्टितम् ॥

calā vibhūtiḥ kṣaṇabhaṅgi yauvanaṃ
kṛtântadantântaravarti jīvitam |
tathâpy avajñā paralokasādhaneṣv
aho nṛṇāṃ vismayakāri ceṣṭitam ||

vallabhadevasya *subhāṣitâvalyām* 3315 (upendravajrā), p. 558

52. यदालोकं कुर्वन् भ्रमति रविरश्रान्ततुरगः
सदा लोकं धत्ते यदगणितभारा वसुमती ।
न स स्वार्थः कश्चित् प्रकृतिरियमेषैव महतां
यदेते लोकानां हितसुखरसैकान्तरसिकाः ॥

yad ālokaṃ kurvan bhramati ravir aśrāntaturagaḥ
sadā lokaṃ dhatte yad agaṇitabhārā vasumatī |
na sa svârthaḥ kaścit prakṛtir iyam eṣâiva mahatāṃ
yad ete lokānāṃ hitasukharasaikântarasikāḥ ||

candragominaḥ *śiṣyalekhe* 101 (śikhariṇī), p. 559

53. ऋज्वी स्थिरा सुवृत्ता पाणिग्रहणोज्ज्वला सुवंशोत्था।
संधारयति पतन्तं सम्प्रति गृहिणीव यष्टिर्माम्॥

ṛjvī sthirā suvṛttā pāṇigrahaṇôjjvalā suvaṃśôtthā |
saṃdhārayati patantaṃ samprati gṛhiṇîva yaṣṭir mām ||

vallabhadevasya *subhāṣitâvalyām* 3311 (āryā), p. 560